# द्वितीयसमाकलनपरीक्षा, 2017

## संस्कृतम्

अवधि - होरात्रयम् | कक्षा - सप्तमी | पूर्णांकाः - अशीतिः

विद्यार्थिनः नाम ............................................................................................ वर्गः ....... दिनांकः - 22.9.2017 (शुक्रवासरः)

**निर्देशाः -**

- **सर्वे प्रश्नाः अनिवार्याः सन्ति ।**
- **प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।**
- **प्रश्नपत्रं चतुर्भागेषु विभक्तमस्ति अतः भागानाम् उल्लेखः करणीयः ।**

## खण्डः क (अपठितावबोधनम् - 05 अंकाः)

**प्र.1 अधोलिखितम् गद्यांशम् पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि लिखत -**

भारतम् पर्वणाम् देशः मन्यते । विजयादशमी अपि एकम् प्रमुखम् पर्वम् अस्ति । अयम् महोत्सवः आश्विनमासे आगच्छति । क्षत्रियाः अस्मिन् अवसरे अस्त्राणाम् शस्त्राणाम् च पूजाम् कुर्वन्ति । अस्मिन् एव दिवसे श्रीरामः दुष्टम् रावणम् हत्वा सीतायाः रक्षाम् अकरोत् । इदम् पर्व असत्यस्योपरि सत्यस्य विजयस्य प्रतीकम् अस्ति ।

**(i) एकपदेन उत्तरत -** **(½×4=2)**

(क) भारतस्य प्रमुखपर्वस्य नाम लिखत । (महोत्सवः / विजयादशमी)

(ख) अयम् महोत्सवः कदा आगच्छति ? (चैत्रमासे / आश्विनमासे)

(ग) अस्त्राणाम् शस्त्राणाम् च पूजां के कुर्वन्ति ? (सर्वेजनाः / क्षत्रियाः)

(घ) दुष्टः कः आसीत् ? (क्षत्रियः / रावणः)

**(ii) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

(क) विजयादशमी कस्य प्रतीकम् अस्ति ?

(ख) अस्मिन् दिवसे क्षत्रियाः किम् कुर्वन्ति ?

**(iii) निम्नांकितयोः विभक्तिम् लिखत -** **(½×2=1)**

(क) दुष्टः

(ख) शस्त्राणाम्

## खण्ड - ख (रचनात्मककार्यम् - 20 अंकाः)

**प्र.2 अधोलिखितसंवादे रिक्तस्थानानि मञ्जूषायाः समुचितपदैः पूरयत -** **(1×5=5)**

| |
|---|
| **क्रीडामि, तस्मै, अस्ति, कन्दुकम्, यच्छ** |

समयः - हे शुभे ! मह्यम् कन्दुकम् .......1.......।

शुभा - अहम् तु कन्दुकेन ....... 2....... त्वम् अन्यम् क्रीडनकम् नीत्वा क्रीड ।

श्रेयः - भो शुभे ! समयः तु तव अनुजः .......3....... अतः त्वम् .......4....... कन्दुकम् यच्छ ।

शुभा - आगच्छ समय ! .......5....... नय ।

**प्र.3 सद्वृत्तिप्रमाणपत्राय आचार्यम् प्रति मञ्जूषायाः सहायतया पत्रम् लिखत । (½×10=5)**

5, पटेलनगरम्

रायगढनगरम्

तिथिः 22.09.2017

मान्यमहानुभाव !

सेवायाम्

इदं .......1....... यत् मया .......2....... एव .......3....... भवतां .......4....... प्रावेशिकी परीक्षा द्वितीयश्रेण्याम् .......5.......। मम वि द्यालयस्य क्रमांकः **सप्तम्याः** कक्षायाः .......6....... इति अभूत् । अहम् पादकन्दुकक्रीडायाः प्रमुखः क्रीडकः आसम् । .......7 ....... आचरणम् .......8....... आसीत् । इदानीम् अहम् काञ्चन सेवां लब्धुम् यत्नवान् .......9.......। कृपया .......10....... मम सद्वृत्तिप्रमाणपत्रं मम परिचयेन प्रेषणीयम् ।

धन्यवादः !

भवदीयः प्रियः शिष्यः

श्रेयः

| |
|---|
| **यथाशीघ्रम्, निवेदनम्, विद्यालयात्, मम, अस्मिन्,** |
| **त्रिंशत्, विशुद्धम्, वर्षे, उत्तीर्णा, अस्मि** |

**प्र.4 अधोलिखितम् चित्रं मञ्जूषायाः सहायतया पञ्चवाक्येषु वर्णयत - (2×5=10)**



| |
|---|
| एकः, पितामहः, पितामही, मातामही, समाचारपत्रम्, क्रीडनकम्, यच्छति, चायम्, |
| हसति, तिष्ठति, एतत् चित्रम्, बालकः, आनयति, अस्ति, गृहस्य, बालिका, एका |

## खण्डः ग (अनुप्रयुक्तव्याकरणम् - 15 अंकाः)

**प्र.5 अधोलिखितवर्णयोः उच्चारणस्थानं चित्वा लिखत -** **(1×2=2)**

(क) 'अश्वः' पदे 'श्' वर्णस्य उच्चारणस्थानं किम् अस्ति ?

(अ) मूर्धा (ब) नासिका (स) तालुः

(ख) 'ए, ऐ' अनयोः उच्चारणस्थानम् किम् अस्ति ?

(अ) दन्तः (ब) कण्ठतालुः (स) दन्तोष्ठः

**प्र.6 अधोलिखितेषु सन्धिं विच्छेदं वा लिखत -** **(1×3=3)**

(क) दैत्य + अरिः = ....................

(ख) परमेशः = ................+..................

(ग) तदैव = ...............+...................

**प्र.7 उचितशब्दरूपैः शब्दरूपेषु रिक्तस्थानपूर्तिं कुरुत -** **(1×3=3)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | रमा | रमे | .......1....... |
| द्वितीया | .......2....... | तौ | तान् |
| तृतीया | बालकेन | .......3....... | बालकैः |

**प्र.8 उचितधातुरूपैः धातुरूपेषु रिक्तस्थानपूर्तिं कुरुत -** **(1×3=3)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | .......1....... |
| मध्यमपुरुषः | .......2....... | **पिबथः** | **पिबथ** |
| उत्तमपुरुषः | पठामि | .......3....... | पठामः |

**प्र.9 अधोलिखितवाक्येषु अंकानाम् स्थाने शब्देषु समयं चित्वा लिखत -** **(1×4=4)**

(क) सः .......7:15....... वादने विद्यालयं गच्छति । (पादोनसप्त/सपादसप्त)

(ख) सः .......12:45....... वादने विद्यालयात् गृहं आगच्छति । (एक/पादोनएक)

(ग) सः सायं .......4:30....... वादने क्रीडति । (सार्धचतुर्/पञ्च)

(घ) सः सायं .......8:00....... वादने अध्ययनं करोति । (अष्ट/सपाद अष्ट)

## खण्डः घ (पठितावबोधनम् - 40 अंकाः)

**प्र.10 अधोलिखितं गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

अस्ति मगधदेशे फुल्लोत्पलनाम सरः। तत्र संकटविकटौ हंसौ निवसतः । कम्बुग्रीवनामकः तयोः मित्रम् एकः कूर्मः अपि तत्रैव प्रतिवसति स्म । अथ एकदा धीवराः तत्र आगच्छन्। ते अकथयन् – "वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः । "एतत् श्रुत्वा कूर्मः अवदत् – "मित्रे ! किम् युवाभ्यां धीवराणां वार्ता श्रुता ? अधुना किम् अहं करोमि ?" हंसौ अवदताम् – "प्रातः यद् उचितं तत्कर्त्तव्यम् ।

"कूर्मः अवदत् - "मैवम्, तद् यथाऽहम् अन्यं ह्रदं गच्छामि तथा कुरुतम् । "हंसौ अवदताम् - "आवां किम् करवाव ?" कूर्मः अवदत् - "अहं युवाभ्यां सह आकाशमार्गेण अन्यत्र गन्तुम् इच्छामि ।"

**(i) एकपदेन उत्तरत -** **(½×4=2)**

(क) कूर्मस्य किम् नाम आसीत् ?

(ख) कुत्र फुल्लोत्पल नाम सरः ?

(ग) कूर्मः केन मार्गेण गन्तुम् इच्छति ?

(घ) संकटविकटयोः मित्रम् कः आसीत् ?

**(ii) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

(क) **कूर्मस्य प्रश्नं श्रुत्वा हंसौ किम् अवदताम् ?**

(ख) सरस्तीरे के आगच्छन् ?

**(iii) निर्देशानुसारं उत्तरत -** **(½×2=1)**

(क) 'श्रुत्वा' इति पदे कः प्रत्ययः ? (तुमुन्/ क्त्वा)

(ख) 'ह्यः' इति पदस्य किम् विलोमपदं अत्र प्रयुक्तम् ? (श्वः / एकदा)

**प्र.11 अधोलिखितं पद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः ॥

**(i) एकपदेन उत्तरत -** **(1×2=2)**

(क) किम् ब्रूयात् ?

(ख) कीदृशम् सत्यं न ब्रूयात् ?

**(ii) पूर्णवाक्येन उत्तरत -** **(1)**

सनातनः धर्मः कः ?

**(iii) निर्देशानुसारं उत्तरत -** **(1×2=2)**

(क) 'असत्यम्' इति स्थाने किम् पदम् अत्र प्रयुक्तम् ? (ब्रूयात् / अनृतम्)

(ख) 'प्रियं' इति पदस्य किम् विलोमपदं अत्र प्रयुक्तम् ? (सत्यम् / अप्रियम्)

**प्र.12 अधोलिखितानाम् प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत -** **(2×5=10)**

(क) शिवनिन्दां श्रुत्वा का क्रुद्धा जाता ?

(ख) रमा कुतः संस्कृतशिक्षां प्राप्तवती ?

(ग) के कोलाहलं कुर्वन्ति ?

(घ) सर्वदा कुत्र सुखम् ?

(ङ) मूढैः कुत्र रत्नसंज्ञा विधीयते ?

**प्र.13 अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (1×4=4)**

(क) विद्यायाः संग्रहेषु त्यक्तलज्जः सुखी भवेत् ।

(ख) कृष्णमूर्तेः अष्ट कर्मकराः सन्ति ।

(ग) स्त्रियः शिक्षां लभन्ते स्म ।

(घ) पितरं कर्मणा सेवेत ।

**प्र.14 अधोलिखितानाम् पदानाम् विभक्तिं वचनं च लिखत - (1×4=4)**

विभक्तिः वचनम्

(क) नारीणाम् ............ ..............

(ख) शिक्षायै ............ ..............

(ग) **मनोरमया** ............ ..............

(घ) पृथिव्यां ............. ..............

**प्र.15 अधोलिखितानि रिक्तस्थानानि मञ्जूषायाः सहायतया पूरयत - (1×4=4)**

| **भक्षयिष्यामः, अलम्, वायुश्च, द्वादश** |
|---|

(क) ........................विवादेन ।

(ख) मासाः..............भवन्ति ।

(ग) वयं गृहं नीत्वा कूर्मं.....................।

(घ) सत्येन वाति..................सर्वं सत्ये प्रतिष्ठितम् ।

**प्र.16 मञ्जूषातः विलोमपदानि चित्वा लिखत - (1×4=4)**

| **नीचैः, बहिः, दुर्लभम्, उपरि** |
|---|

(क) अधः ........................

(ख) अन्तः ........................

(ग) उच्चैः ........................

(घ) सुलभम् ........................

**प्र.17 मञ्जूषातः समानार्थकपदानि चित्वा लिखत - (1×4=4)**

| **अम्बा, प्रस्तरे, तूष्णीम्, पशवः** |
|---|

(क) शिलायां ........................

(ख) जन्तवः ........................

(ग) माता .......................

(घ) मौनम् ........................